# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Honours 3rd Semester Examinations, 2022

## SANSKRIT

## HISTORY OF CLASSICAL SANSKRIT LITERATURE

## CORE-5

Time Allotted: 2 Hours Full Marks: 40

*The figures in the margin indicate full marks.*

1. कस्यापि एकस्य उत्तरं प्रदेयम् – 15×1 = 15

(क) कस्तावद् इतिहासः ? संस्कृतसाहित्यस्य ऐतिहासिककाव्यानां सविशदमालोच्यताम्।

(ख) किं तावद् गीतिकाव्यम् ? संस्कृतगीतिकाव्यानां संक्षेपेण विवरणं दीयताम्।

(ग) किं तावद् चम्पूकाव्यम् ? संस्कृत चम्पूकाव्यविषये नीतिदीर्घः कश्चित् प्रबन्धो लिख्यताम्।

2. संस्कृतभाषया देवनागरीलिप्याम् एकस्य उत्तरं प्रदेयम् – 10×1 = 10

(क) पुराणशब्दस्य का व्युत्पत्तिः ? 'पुराणं पञ्चलक्षणम्' इति व्याख्यायताम्।

(ख) महाभारते प्रतिफलितं समाजचित्रं वर्णनीयम्।

3. संस्कृतभाषया देवनागरीलिप्याम् एका टिप्पणी कार्या – 5×1 = 5

शूद्रकः, रघुवंशम्, रत्नावली, उत्तररामचरितम्।

4. यथेच्छं दशप्रश्नानामुत्तरं लेखनीयम् (संस्कृतभाषया देवनागरीलिप्याम् च) – 1×10 = 10

(क) बृहत्कथा कया भाषया विरचिता ?

(ख) रामायणस्य काण्डानां नाम लिखत।

(ग) संस्कृतसाहित्ये कस्तावत् प्राचीनतमः कथासंग्रहः?

(घ) कः ग्रन्थः 'शतसाहस्रीसंहिता' इत्युच्यते ? अस्य लेखकः कः ?

(ङ) अश्वघोषस्य ग्रन्थानां नामानि लिखत।

(च) भवभूतेः प्रकरणस्य नाम किम् ?

(छ) 'गाथासप्तशती' इत्यस्य प्राकृतं नाम लिखत।

(ज) शिशुपालवधस्य रचयिता कः ?

(झ) वासवदत्ता केन विरचिता ?

(ञ) भारवेः अपरं नाम किम् ? तस्य विरचितं काव्यं किम् ?

(ट) श्रीहर्षस्य काव्यानां नाम लिख्यताम्।

(ठ) कतिपयस्य व्याकरणकाव्यस्य नाम लिखत।

(ड) संस्कृतसाहित्यस्य वीररसप्रधाननाटकद्वयस्य नाम लिख्यताम्।

(ढ) किं खलु प्राकृतभाषया विरचितं राजशेखरस्य रूपकम् ?

(ण) संस्कृतसाहित्यस्य एकस्य प्रहसनस्य नाम लिखत। तस्य रचयिता कः ?

——×——

# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Honours 3rd Semester Examinations, 2022

## SANSKRIT

## INDIAN SOCIAL INSTITUTIONS

## CORE-6

Time Allotted: 2 Hours    Full Marks: 40

*The figures in the margin indicate full marks.*

### Unit-I

1. संस्कृतभाषया देवनागरीलिप्यां च एकस्य प्रश्नस्य उत्तरं लेखनीयम् – 15×1 = 15

(क) मनुसंहितायाः द्वितीयाध्याये वर्णितानां देशानां भौगोलिकं विवरणं तथा वैशिष्ट्यमुलिख्यताम्।

(ख) कस्तावत् संस्कारः ? चतुर्णां वर्णानां कृते मनुविहितानां संस्काराणां विवरणं दीयताम्।

2. संस्कृतभाषया देवनागरीलिप्यां च पञ्चानां प्रश्नानां संक्षिप्तमुत्तरं लेखनीयम् – 1×5 = 5

(क) कः उच्यते स्वाध्यायः ?

(ख) ब्राह्मणस्य उपनयकालः कः ?

(ग) क उच्यते आर्यावर्तदेशः ?

(घ) नामकरणं कदा विधीयते ?

(ङ) क उच्यते सदाचारः ?

(च) के खलु पाकयज्ञाः ?

(छ) मनुसंहितायाः द्वयोः टीकयोः नामनी लिखत ?

(ज) मनुसंहितायाः कति अध्यायाः सन्ति ?

Bakshirhat Mahavidyalaya
Estd 2005
Bakshirhat, Coochbehar

## Unit-II

3. एकस्योत्तरं प्रदेयम् – 10×1 = 10

(क) को नाम व्यवहारः ? याज्ञवल्क्यमनुसृत्य चतुष्पादव्यवहार आलोच्यताम्।

(ख) किं नाम ऋणादानम् ? ऋणादानविषये याज्ञवल्क्यमतं सविस्तरम् आलोचनीयम्।

4. संस्कृत-भाषया देवनागरीलिप्या च टिप्पणी कार्या एकस्यः – 5×1 = 5

(क) स्त्रीधनम्, (ख) स्तेयः, (ग) प्रतिभूः।

5. संस्कृतभाषया देवनागरीलिप्या च पञ्चानां प्रश्नानां संक्षिप्तमुत्तरं लेखनीयम् – 1×5 = 5

(क) 'मिताक्षरा' इति टीकायाः रचयिता कः ?

(ख) को नाम आधिः ?

(ग) कः खलु उपनिधिः ?

(घ) किं खलु वाक्पारुष्यम् ?

(ङ) क उच्यते प्राड्विवाकः ?

(च) प्रमाणं कतिविधम् ?

(छ) याज्ञवल्क्यसंहितायां कति अध्याया सन्ति ?

——×——

# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Honours 3rd Semester Examinations, 2022

## SANSKRIT

## SANSKRIT GRAMMAR

## CORE-7

Time Allotted: 2 Hours | Full Marks: 40

*The figures in the margin indicate full marks.*

सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च लेखनीयम् –

### Unit-I

1. अधोलिखितेषु द्वयोः सूत्रयोः व्याख्या कार्या – 5×2 = 10

(क) नलोपः प्रातिपदिकान्तस्य।

(ख) अमि पूर्वः।

(ग) यस्येति च।

(घ) घेर्ङिति।

(ङ) विरामोऽवसानम्।

2. अधोलिखितेषु द्वयोः ससूत्रं पदसाधनं क्रियताम् – 5×2 = 10

रामाः, रामेभ्यः, ज्ञानानि, रमायाः, रमया, रामेषु।

### Unit-II

3. अधोलिखितेषु द्वयोः ससूत्रं व्याख्या कार्या – 5×2 = 10

(क) अचोयत्।

(ख) तेन प्रोक्तम्।

(ग) चरेष्टः।

(घ) अत इञ्।

(ङ) शिवादिभ्योऽण्।

4. अधोलिखितेषु द्वयोः ससूत्रं पदसाधनं क्रियताम् – 5×2 = 10

दैत्यः, शिष्यः, चयनीयः, प्रियंवदः, भिन्नः, पक्वः।

——×——

# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Honours 3rd Semester Examinations, 2022

## SANSKRIT

## COMMUNICATIVE SANSKRIT

## SEC-1

Time Allotted: 2 Hours | Full Marks: 40

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

संस्कृतभाषायां देवनागरीलिप्यां उत्तरं लेखनीयम्

### Unit-I

1. अधः प्रदत्तैः शब्दैः संलापं विरचयत (एकस्य) – 15×1 = 15

(क) द्वयोः मित्रयोः मध्ये संलापः।
विषयः – पूजावकाशयापनम्
संकेतशब्दाः – नववस्त्रम्, आत्मीयपरिजनम्, भोजनम्, भ्रमणम्, बन्धुभिः सह आनन्दानुभवः, मानसिकभावः, पठनविषये चिन्तनम्।

(ख) विषयः – दीपावली पालनम्।
संकेतशब्दाः – दीपावलीतिथिः, प्रदीपैः गृहसज्जा, वैद्युतिक-दीपानां व्यवहारः, कालीपूजोपलक्षे मण्डपे मण्डपे पथिपार्श्वे आलोकसज्जा, विस्फोटानां विकटाः शब्दा, वयस्कनागरिकाणां विडम्बना, वार्ताः।

### Unit-II

2. अधोलिखितेषु पञ्चानाम् आङ्गलशब्दानां संस्कृतप्रतिशब्दं लिखत। 1×5 = 5

Jaw, Eye-lid, Noticeboard, Registration, Nurse, Butcher, Tarmarind, Jackfruit.

### Unit-III

3. कालनिर्धारणं कार्यम् (पञ्चानाम्) – 1×5 = 5

(i) 2.25 P.M., (ii) 12 Noon, (iii) 11.59 A.M., (iv) 6.13 A.M., (v) 5.35 P.M., (vi) 7.45 A.M., (vii) 8.20 A.M., (viii) 9.15 P.M.

4. अधोलिखितेषु पञ्चानां संख्यावाचकशब्दानां संस्कृते रूपान्तरं कार्यम् – 1×5 = 5

(i) 33, (ii) 27, (iii) 77, (iv) 63, (v) 88, (vi) 90, (vii) 55, (viii) 60.

### Unit-IV

5. तव भगिन्याः विवाहोपलक्षे मित्रसमीपम् एकं निमन्त्रणपत्रं प्रेरयत। 10

अथवा

महाविद्यालयस्य छात्रावासे निरापत्ताविषये व्यवस्थाग्रहणार्थम् अध्यक्षसमीपम् आवेदनपत्रमेकं रचयत। 10

———×———

# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Programme 3rd Semester Examinations, 2022

## SANSKRIT

## HISTORY OF CLASSICAL SANSKRIT LITERATURE AND TRANSLATION

## DSC (GROUP-1)

Time Allotted: 2 Hours　　　　Full Marks: 40

*The figures in the margin indicate full marks.*

### Unit-I

1. एकस्योत्तरं लेखनीयम्।　　　　15×1 = 15

(क) भारतीय संस्कृतौ साहित्ये च महाभारतस्य प्रभावं विशदीक्रियताम्।

अथवा

(ख) संस्कृत महाकाव्ये कालिदासस्य अवदानं आलोच्यताम्।

2. एकस्योत्तरं प्रदेयम्।　　　　10×1 = 10

नाट्यसाहित्ये भासस्य प्रसिद्धिरिति विषयमधिकृत्य नातिदीर्घो निबन्धो लिख्यताम्।

अथवा

किं नाम गीतिकाव्यं ? किं च तस्य वैशिष्ट्यम् ? संस्कृतसाहित्ये गीतिकाव्यम् आश्रित्य कश्चित् नातिदीर्घः प्रबन्धो लिख्यताम्।

3. टिप्पणी कार्या (एकस्य) –　　　　5×1 = 5

अभिज्ञानशकुन्तलम्, भगवद्गीता, कुमारसम्भवम्, पञ्चतन्त्रम्, मुद्राराक्षसम्।

4. अधोलिखितानां पञ्चप्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्।　　　　1×5 = 5

(क) महाभारते कति पर्वाणिसन्ति ?

(ख) रामायणे कति काण्डा सन्ति ?

(ग) रामायणस्य को मुख्यो रसः ?

(घ) वेणीसंहारमिति नाटकं केन विरचितम् ?

(ङ) 'शिशुपालबधम्' महाकाव्यस्य नायकः कः ?

(च) 'हर्षचरितम्' कस्य कृतिरस्ति ?

(छ) हितोपदेशस्य कति परिच्छेदाः सन्ति ?

(ज) सोमदेवस्य का कृतिररित ?

## Unit-II

5. संस्कृतभाषया देवनागरीलिप्या च अनुवादः करणीयः (पञ्चानाम्) – 1×5 = 5

(ক) দশরথের মন্ত্রীর নাম সুমন্ত্র।

(খ) হিমালয় হইতে ব্রহ্মপুত্রের উদ্ভব।

(গ) শিক্ষক হইতে ছাত্রদের জ্ঞানলাভ হয়।

(ঘ) বেদ আর্যদের ধর্মগ্রন্থঃ।

(ঙ) সুপুত্রদ্বারা বংশের প্রকাশ হয়।

(চ) বৈকুণ্ঠে নারদের বাস।

(ছ) রামায়ণ পাঠ দ্বারা পাপের বিনাশ।

(জ) অহংকার হইতে রাবণের বিনাশ।

Bakshirhat Mahavidyalaya • Estd 2006 • Bakshirhat, Coochbehar

——×——

COOCH BEHAR PANCHANAN BARMA UNIVERSITY

# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Programme 3rd Semester Examinations, 2022

## SANSKRIT

## SEC-1

Time Allotted: 2 Hours Full Marks: 40

*The figures in the margin indicate full marks.*

1. निम्नलिखितेषु पञ्चानां शब्दरूपं संस्कृतभाषया देवनागरीलिप्या च विधेयम्। $1\times5 = 5$

(क) 'अस्मद्' इत्यस्य पञ्चमीविभक्तेः द्विवचनम्।

(ख) 'आत्मन्' इत्यस्य सप्तमी-एकवचनम्।

(ग) 'लता' इत्यस्य पञ्चमी-एकवचनम्।

(घ) 'मुनि' इत्यस्य षष्ठीबहुवचनम्।

(ङ) 'नर' इत्यस्य सप्तमी-द्विवचनम्।

(च) 'युष्मद्' इत्यस्य तृतीया-एकवचनम्।

(छ) 'नदी' इत्यस्य द्वितीयाविभक्तेर्बहुवचनम्।

(ज) 'साधु' इत्यस्य प्रथमाविभक्तेर्बहुवचनम्।

2. अधःस्थितेषु पञ्चानां धातुरूपं संस्कृतभाषया देवनागरीलिप्या च लेखनीयम् – $1\times5 = 5$

(क) भू धातोः लङ् प्रथमपुरुषस्य द्विवचनम्।

(ख) भू धातोः लटः उत्तमपुरुषस्य बहुवचनम्।

(ग) सेव् धातोः लोटः प्रथमपुरुषस्य बहुवचनम्।

(घ) गम् धातोः लृटः मध्यमपुरुषस्य एकवचनम्।

(ङ) कृ धातोः लङ् प्रथमपुरुषस्य एकवचनम्।

(च) गम् धातोः विधिलिङः उत्तमपुरुषस्य एकवचनम्।

(छ) सेव् धातोः लृटः मध्यमपुरुषस्य बहुवचनम्।

(ज) कृधातोः विधिलिङः प्रथमपुरुषस्य एकवचनम्।

3. अधोलिखितेषु पञ्चानाम् अव्ययानाम् अर्थोल्लेखपूर्वकं संस्कृतभाषया वाक्यरचना करणीया। $2\times5 = 10$

अत्र, कुत्र, अधुना, च, अद्य, अनु, अलम्, सदा, श्वः।

/CBCS/B.A.

4. अधोलिखितेषु पद्यानां रेखाङ्कितपदानां कारकविभक्तै निर्णयत। 2×5 = 10

(क) कन्या वनं गच्छति।

(ख) गृहं परितः वृक्षाः सन्ति।

(ग) पादेन खञ्जः।

(घ) गां दोग्धिः पयः।

(ङ) रामेण सह सीता गच्छति।

(च) गृहात् आगच्छति।

(छ) नराणां ब्राह्मणः श्रेष्ठः।

Basirhat Mahavidyalaya
Estd 2006

5. अधःस्थितसंदर्भानुसारं प्रश्नाः समाधेयाः। 10

भारतस्य सर्वेषु अपि राज्येषु स्त्रीणां विषये क्रियमाणाः अत्याचाराः अनुदिनम् अनुक्षणम् एधमानाः दृश्यन्ते। कामान्धीकृतचेतसां भोगतृष्णाशमनाय वयर्भेदं विना आबालवृद्धं नारीजनाः बलिपशवः इव भवन्ति। वेदकालात् आरभ्य भारतीय समाजे स्त्रीणां समुज्वलम् उन्नतं च स्थानम् आसीत्। ऋग्वेदादिषु सर्वेषु वेदेषु स्त्रीणां श्रेष्ठता बहुधा कीर्तिना दृश्यते। वेदेषु कुत्रापि स्त्री निन्दा न वर्तते। वेदे ऋषिका ब्रह्मवादिनी, आचार्या, उपाध्याया, यजमानपत्नी, योगिनी, यजमाना, गृहिणी, इत्येव विभिन्नैः पदैः स्त्री समुल्लिखिता दृश्यते। स्त्री पुरुषयोः समानं स्थानमेव ऋषिभिः परिकल्पितम्। अर्धनारीश्वरसंकल्पनम् एव तस्य प्रत्यक्षं प्रमाणम्। –
इति उल्लिखितमनुच्छेदमबलम्ब्य व्याकरणमत्-पद्यानाम् उत्तरं प्रदेयम् –

(क) विभक्तिनिर्णयः करणीयः (द्वयोः) 2
स्त्रीणाम्, राज्येषु, पदैः, वेदकालात्।

(ख) द्वयोः प्रकृति-प्रत्ययः विधेयः – 2
आरभ्य, दृश्यते, परिकल्पितम् एधमानाः।

(ग) द्वयोः सन्धिविच्छेदः करणीयः – 2
कुत्रापि, अत्याचाराः, स्थानमेव, इत्येवम्।

(घ) उल्लिखित्तात् अनुच्छेदात् यथेच्छम् अव्यय द्वयं अन्वेषणीयम्। 2

(ङ) यथामति द्वयोः समार्थकशब्दः लेखनीयः – 2
नारी, वेदः, दिनम्, आचार्या।

——×——